## अध्याय :- ३२ chapter-32

नारद उवाच ।।[१]

श्रुत्वेतं संस्तवं दैत्यः संघुष्टं देव बंदिभिः ।।
सस्मारं ब्रह्मग्रणो वाक्यं ऽवधं बालादुपस्थितम् ।। १

श्रुत्वा स क्लिन्नसर्वांगो द्वाः स्थं राजा बचोऽब्रवीत् ।।
अमात्यान्द्रष्टुमिच्छामि शीघ्रमानय मा चिरम् ।। २

ततस्ते राजवचनात्कालनेमि मुखागताः[२] ।।
प्राह तांस्तारको दैत्यः किमिदं वो विचेष्टितम् ।। ३

यैः शत्रुसंभवा वार्ता कापि न श्रावितस्त्वहम् ।।
हितं मन्त्रयते राक्षस्तेन मंत्री निगद्यते ।। ४

अमात्या[३] ऊचुः ।।
को जानाति सुरान्दीनान्दैत्यानामिति नो मतिः ।। ५

मा विषीद महाराज वयं जेष्यामहे सुरान् ।।
बालादपि भयं किं वा लज्जायैः चिंतितं ~~त्वम्~~ **त्विदम् ।। ६

सर्वमेतत्सुसाध्यं च भेरी संताडयतां दृढम् ।।
ततो दैत्येन्द्रवचनात्संनाह जननी तदा ।। ७

---

१ ब. श्री नारद
२ ब. प्रतौ "पुरागमाः " इति स्यात् ।
३ ब. प्रतौ आ

भृशं संताडिता भेरी कंपयामास सा जगत् ।।
स्मरणा दैत्य राजस्य पर्वतेभ्यो महासुराः ।। ८

निम्नगाभ्यः समुद्रेभ्यः पातालेभ्योंऽबरादपि ।।
सहसा समनुप्राप्ता युगांतानलसप्रभाः ।। ९

कोटि कोटि सहस्त्रेषु परार्धैर्दशभिः शतैः ।।
सेनापतिः कालनेमिः शीघ्रं देवानुपाययौ ।। १०

चतुर्योजन वीस्तीर्णे नानमश्चर्य समन्विते ।।
रथे स्थितो मनागुदीनस्तारकः समदृश्यत ।। ११

एतस्मिन्नंतरे पार्थ क्रुद्धः स्कन्दस्य पार्षदिः ।।
प्राकारः पातितः सर्वो भग्नान्युपवनानि च[१] ।। १२

ततश्चचाल वसुधा देवी सवन कानना ।।
जज्वाल खं सनक्षत्रं प्रमूढं भुवनं भृशम् ।। १३

तमोभूतं जगच्चासीद्गृधिव्यार्प्तं नभोऽभवत् ।।
ततो नानाप्रहरणं प्रलयांबुदसन्निभम् ।। १४

---

१ ब. प्रतौ नास्ति ।

कालनेमिमुखं पार्थ अदृश्यत महद्बलम् ।।
तद्धि घोरमसंख्येयं जगर्ज विविधा गिरः ।। १५

अभ्यद्रवद्रणे देवान्भगवंतं च शंकरम् ।।
विनदद्भिस्ततो दैत्यैर्देवानीकं [1]महायुधैः ।। १६

पर्वतैश्च शतघ्नीभिरायसैः पट्टिशैरपि ।।
क्षणेन[2] द्रावितं सर्वं विमुखं चाप्यदृश्यत[3] ।। १७

असुरैर्वध्यमाने तु पावकैरिव काननम् ।।
अपतदाव भूमिष्ठं महाद्रुमवनं यथा ।। १८

ते भिन्नास्थिशिरोदेहाः प्राद्रवंत दिवौकसः ।।
न नाथमध्यगच्छंत वध्यमाना महासुरैः ।। १९

अथ तद्विद्रुतं सैन्यं दृष्ट्वा देवः पुरंदरः ।।
आश्वासयन्नुवाचेदं बलवदानवार्दितम् ।। २०

भयं त्यजत भद्रं वः शूराः शस्त्राणि गृह्णत ।।
कुरुध्वं विक्रमे बुद्धिं मा च काचिद्व्यथास्तु वः ।। २१

---

१ ब. सहायुद्धैः
२ ब. द्रुणेन
३ ब. ते

एष कालानलप्रख्यो मयूरं समुपस्थितः ।।
रक्षितो वो महासेनः कथं भीतिस्तथापि वः ।। २२

शक्रस्य वचनं श्रुत्वा सम[1] श्रुवस्ता दिवौकसः ।।
दानवान्प्रत्ययुध्यंत शक्रं कृत्वा व्यपाश्रयम् ।। २३

कालनेमिर्महेन्द्रेण संयुगे समयुज्यत[2] ।।
सहस्त्राक्षौहिणीयुक्तो जंभकः शंकरेण च ।। २८

कुजंभो विष्णुना चैव तावत्यक्षौहिणीवृतः ।।
अन्ये च त्रिदशाः सर्वे मरुतश्चैव महाबलाः ।। २५

प्रत्ययुध्यंत दैत्येंद्रैः साध्याश्चैव वसुभिः सह ।।
ततो बहुविधं युद्धं कालनेमिर्विधाय च ।। २६

उत्सृज्य सहसा पार्थ ऐरावण शिरः स्थितः ।।
स तु पादप्रहारेण मुष्टिना चैव तं गजम् ।। २७

शक्रं च जघ्ने विनदन्पेततुस्तावुभौ भुवि ।।
ततः शक्रं समादाय कालनेमिर्विचेतसम् ।। २८

---

१ ब. समा
२ ब. तै

रथमाश्रित्य भूयोपि तारकाभिमुखो ययौ ।।
अथ[1] कुष्ठं तदा देवैः सहसाचांतकादिभिः ।। २९

हित्यते हित्यते राजा त्राता कोऽपि न विद्यते ।।
एतस्मिन्नंतरे शर्वः पिनाकधनुषान्वितः ।। ३०

बाणैः ससैन्यं कृत्वा च जंभकं गृध्रमोदनम् ।।
कालनेमिं[2] समागम्य रथस्थो वाक्यम् ब्रवीत् ।। ३१

किमेतेन महेन्द्रेण मया युध्यस्व दानव ।।
वीरंमन्य सुदुर्बुद्धे ततो ज्ञास्यसि वीरताम् ।। ३२

कालनेमिरुवाच ।।
नग्नेन सह को युद्धेद्वतेनापि च येन वा ।।
शंसस्तु दैत्यवीराणामुपहासः प्रजायते ।। ३३

आत्मनस्तु समं किंचिद्विलोक्य सुदुर्मते ।।
तदाकर्ण्य च सावज्ञं वचः शर्वो विसिष्मिये ।। ३४

ततः कुमारः सहसा मयूरस्थोऽभ्यधावत ।।
कुजुंभं सानुगं हत्वा वासुदेवोप्यधावत ।। ३५

---

१ ब. अथो
२ ब. कालमेमि

ततो हरिश्च स्कंदमाह किमेतेन तव प्रभो ।।
दैत्याधमेन पापेन मुहूर्तं पश्य मे बलम् ।। ३६

एवमुक्त्वा निवार्यैनं केशवो गरुडस्थितः ।।
शार्ङ्गकोदंड निर्मुक्तै बाणैर्दैत्यमवाकिरत् ।। ३७

स तैर्बाणैस्ताडयमानो वज्रैरिव महासुरः ।।
विमुच्य वासवं क्रुद्धो बाणांस्तान्व्यधमच्छरैः ।। ३८

यान्यान्बाणान्हरिर्दिव्यानस्त्राणि च मुमोच ह ।।
निवारयति दैत्यस्तान्प्रहर्सल्लीलयैव च ।। ३९

ततः कौमोदकीं गृह्य क्षिप्रकारी जनार्दनः ।।
मुमोच सैन्यनाथाय सारथिं[1]च व्यचुर्णयत् ।। ४०

ततो रथादेवप्लुत्य विवृत्य वदनं महत् ।।
गरुडं चंचुनादाय स विष्णुं [2]क्षिप्तवान्मुखे ।। ४१

ततोऽभूत्सर्वदेवानां विमोहो जगतामपि ।।
~~चचाल~~ चचाल वसुधा चेलुः पर्वताः सप्त चार्णवाः ।। ४२

---

१ ब. सारथि
२ ब. क्षिप्रवान्

कालनेमिर्नदंश्चैव पानृत्यत महारणे ।।
असंमूढस्ततो विष्णुस्त्वराकाल उपस्थिते ।। ४३

कुक्षिं विदार्य चक्रेण भास्करो/भादिवोदितः ।।
बहिर्भूतो हरिर्स्तेनं मोहयित्वा स्वनिन्दया ।। ४४

पातालस्य तलं निन्ये तत्र शिश्ये[१] स काष्ठवत् ।।
ततश्चक्रेण दैत्यानां निहता दशकोटयः ।। ४५

प्रमोदितास्तथा देवा विमोहास्तत्क्षणाद्बभुः ।।
ततः शर्वस्तमालिंग्य साधु साधु जनार्दन ।। ४६

त्वया यद्विहितं कर्म तत्कर्तान्यो न विद्यते ।।
महिषाद्याः सुदुर्जेया देव्या ये विनिपातिताः ।। ४७

तेषाममित बलो ह्येष त्वया विष्णो विनिर्जितः ।।
तारकामय संग्रामे वध्यस्तेसौ जनार्दन ।। ४८

कंसरूपः पुनस्ते/यं हंतव्यो/ष्टम जन्मनि ।।*२
एवं प्रशंसमानास्ते वासुदेवं जगद्गुरुम् ।। ४९

---

१ ब. प्रतौ "नित्येक इति स्यात् ।

* २ ब. इति श्री स्कंद पुराणे कुमारिका खंडे कालनेमी सैन्य वधः ।।

The next sloka begins with the words नारद उवाच ।।

शस्त्र[1]जालैर्लबुध संज्ञान्दैत्य सैन्यानननाशयत् ।।
तानि दैत्य शरीराणि जर्जराणि महायुद्धैः ।। ५०

अपतन्भूतले पार्थ च्छिन्नाभ्राणीव सर्वशः ।।
ततस्तदानवं सैन्यं हतनाथम भूत्तदा ।। ५१

देवैः स्कंदानुगैश्चैव कृतं शस्त्रैः पराङ्मुखम् ।।
अथो कृष्टं तदा त्द्वष्टैः सर्वैर्देवैर्मुदायुतैः ।। ५२

संहतानि च सर्वाणि तदा तूर्याण्यवादयन् ।।
अथ भग्नं बलं प्रेक्ष्य हतवीरं महारणे ।। ५३

देवानां च महामोदं तारकः प्राह सारथिम् ।।
सारथे पश्य सैन्यानि द्राव्यमाणानि मे सुरैः ।। ५४

यैस्माभिस्तृणवद्दृष्टाः पश्य कालस्य चित्रताम् ।।
तन्मे वाह्य शीघ्रं त्वं रथमेनं सुरान्प्रति ।। ५५

पश्यंतु मे बलं बाहवोर्द्रवंतु च सुराधमाः ।।
ब्रुवन्नेवं सारथिं स विधून्वन्सुमहद्धनुः ।। ५६

---

१ ब. जलै

क्रोधसंरक्तेक्षणो राजा देवसैन्यं समाविशत् ।।
आगच्छमानं तं दृष्वा हरिः[1] स्कंदमथाब्रवीत् ।। ५७

कुमार पश्य दैत्येंद्रं कालं मद्युगात्यये ।।
अयं स येन तपसा घोरेणाराधितः शिवः ।। ५८

अयं स येन शक्राद्याः कृता मर्काः[2] समार्बुदम् ।।
अयं स सर्वस्त्रौधैर्योऽस्माभिर्न जितोरणे ।। ५९

नावज्ञया प्रद्रष्टव्यस्तारकोऽयं महासुरः ।।
सप्तमं हि दिनं तेऽद्य मध्याह्नोऽयं च वर्तते ।। ६०

अवांगस्तमनादेनं जहि वध्योऽन्यथा न हि ।।
एवमुक्ता स शक्रादींस्त्वरितः केशवोऽब्रवीत् ।। ६१

आयासयत दैत्येंद्रं सुखवध्यो यथा भवेत् ।।
ततस्ते विष्णुवचनाद्विनदन्तो दिवौकसः ।। ६२

तमासाद्य शक्राति मुर्दिताः समवा[3]किरन् ।।
प्रहसन्निव देवांस्तान्द्रावयामास तारकः ।। ६३

---

१ ब. हरि
२ ब. प्रती "कर्मा" इति पाठः ।
३ ब. करन्

यथा नास्तिकदुर्वृत्तौ नानाशास्त्रोपदे शकान् ।।
सोढुं[1] शक्ता न ते वीरं महति स्यंदने स्थितम् ।। ६४

महापस्मार संक्रांतं यथैवाप्रियवादिनम् ।।
विधुय सकलान्देवान्क्षणमात्रेण तारकः[2] ।। ६५

आजगाम कुमाराय विधुवन्स महाधनुः ।।
आगच्छमानं तं दृष्ट्वा स्कंदः प्रत्युद्ययौ ततः ।। ६६

तस्यारक्षाद्भवः पार्श्वे दक्षिणं चैव तं हरिः ।।
पृष्ठे च पार्षदास्तस्य कोटिशोऽर्बुदशस्तथा ।। ६७

ततस्तौ सुमहायुद्धे संसक्तौ देवदैत्ययोः[3] ।।
धर्माधर्मविवोदग्रौ जगदाश्चर्यकारकौ ।। ६८

ततः कुमारमासाद्य लीलया तारकोऽब्रवीत् ।।
अहो बालतिबालस्त्वं यत्त्वं गीर्वाणवाक्यतः ।। ६९

आसादयसि मां युद्धे पतंग इव पावकम् ।।
वधेन तव को लाभो मम मुक्तोऽसि बालक ।। ७०

---

१ ब. साढुं
२ ब. तारकं
३ ब. यौ

पिब क्षीरं गृहाणेमं कंदुकं क्रीड लीलया ।।
एवमुक्तः प्रहस्याह तारकं योगिनां गुरुः ।। ७१

शिशुत्वं मावमंस्था मे शिशुः कष्टो भुजंगमः।।
दुष्प्रेक्ष्यो भास्करो बालो दुस्पर्शो/लयोपि पावकः ।। ७२

अल्पाक्षरो न मंत्रः किं संस्फुरो दैत्य दृश्यते ।।
एवमुक्त्वा दैत्यमुक्तं गृहीत्वा कंदुकं च तम् ।। ७३

तस्मिञ्छक्त्यस्त्रमादाय दैत्याय प्रमुमोच ह[2] ।।
तस्य तेन प्रहारेण रथश्चूर्णी कृतो/भवत् ।। ७४

चतुर्योजनमात्रो यो नानाश्चर्य समन्वितः ।।
गरुडस्य सुता ये च शीर्यमाणे रथोत्तमे ।। ७५

मुक्ताः[1] कथंचिदुत्पत्य सागरांत्तरमाविशन् ।।
ततः क्रुद्धस्तारकश्च मुद्गरं क्षिप्तवान्गुहे ।। ७६

विंध्याद्रिमिव तं स्कंदो गृहीत्वा तं व्यताडयत् ।।
स्थिरे तस्योरसि व्युढे मुद्गरः शतधा/गमत् ।। ७७

---

१ ब. मुक्ता
२ ब. प्रतौ नास्ति

मेने च दुर्जयं दैत्यस्तदा षाड्वदनं रणे ।।
चिंतयामास बुद्धया च प्राप्तं तद्ब्रह्मणो वचः[१] ।। ७८

तं भीतमिव चालक्ष्य दैत्यवीराश्च कोटिशः ।।
नंदतो/ति महासेनं नानाशस्त्रै रवाकिरन् ।। ७९

क्रुद्धस्तेषु ततः स्कंदः शक्तिं घोरामथाददे ।।
अभ्यस्यमाने शक्तयस्त्रे स्कंदेनामित तेजसा ।। ८०

उल्काजालं महाघोरं पपात वसुधातले ।।
चाल्यमाना तथा शक्तिः सुघोरा भवसूनुना ।। ८१

ततः कोट्या[२] विनिष्पेतुः शक्तिनां भरतर्षभ ।।
स शक्त्यस्त्रेण बलवान्करस्थैनाहनत्प्रभुः ।। ८२

अष्टौ पद्मानि दैत्यानां दशकोटि शतानि च ।।
तथा नियुतसाहस्त्रं वाहनं कोटिरेव च ।। ८३

हत्रदोदरं च दैत्येंद्रं निखर्वैर्दशभिर्वृतम् ।।
तत्राकुर्वन्सुतुमुलं नादं वध्येषु शत्रुषु ।। ८४

---

१ ब. वच
२ ब. कोधी

कुमारानुचराः पार्थ पूरयंतो दिशो दश ।।
शक्त्यस्त्रस्यार्चिः संभूत शक्तिभिः केऽपि सूदिताः ।। ८५

पताकयावधूताश्च हताः[१] केचित्सहस्त्रशः ।।
केचिद्घंटारवत्रस्ताश्छिन्नभिन्नात्ददोऽपतन् ।। ८६

केचिन्मयूर पक्षाभ्यां चरणाभ्यां च सूदिताः ।।
कोटिशस्ताम्र चूडेन विदार्यैव च भक्षिताः ।। ८७

पार्षदैर्मातृभिः सार्ध पद्ममशो निहताः परे ।।
एवं निहन्यमानेषु दानवेषु[२] गुहादिभिः ।। ८८

अभाग्यैरिव लोकेषु तारकः स्कंदमायसौ ।।
जग्राह च गदां दिव्यां लक्षघंटादुरासदाम् ।। ८९

तया मयूरमाजघ्ने मयूरो विमुखोऽभवत् ।।
दृष्ट्वा पराङ्मुखं स्कंदं वासुदेवोऽब्रवीत्त्वरन् ।। ९०

देव सेनापते शीघ्रं शक्तिं मुंच महासुरे ।।
प्रतिज्ञामात्मनः पाहि लंबते रविमंडलम् ।। ९१

---

१ ब. हता
२ ब. दनवे

स्कंद उवाच ।।
त्वयैव रुद्रभक्तोऽयं जनार्दन ममेरितम्[1] ।।
वधार्थं रुद्रभक्तस्य बाहुः शक्तिं न मुंचति ।। ९२

नारुद्रः पूजयेद्रुद्रं भक्तरूपस्य यो हरः ।।
रुद्ररूपममुं हत्वा कीदृशं जन्म नो भवेत् ।। ९३

तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ताः प्रपीडिताः ।।
रुद्रभक्ताः कुलं सर्वं निर्दहंति हताः[2] किमु ।। ९४

एषा चेद्वंति तद्भद्रं हन्यतामेषा मां रणे ।।
रुद्रभक्ते पुनर्विष्णो नाहं शस्त्रमुपाददे ।। ९५

[3]श्री भगवान उवाच ।।
नैतत्तवोचितं स्कंद रुद्रभक्तो यथा शृणु ।।
द्वे तनू गिरिजाभर्तुर्वेदज्ञा मुनयो विदुः ।। ९६

एका जीवात्मिका तत्र प्रत्यक्षा च तथापरा ।।
द्रोग्धा भूतेषु भक्तश्च रुद्रभक्तः न स स्मृतः ।। ९७

भक्तो रुद्रे कृपावांश्च जंतुष्वेव हरव्रतः ।।
तदेनं भूतमर्त्येषु द्रोग्धारं त्वं पिनाकिन ।। ९८

---

१ ब. ममेरितः
२ ब. हता
३ ब. श्री भगवानुवाच ।।

जहि नैवात्र पश्यामि दोषां कंचन ते प्रभो ।।
श्रुत्वेति वाचं गोविंदात्सत्यार्थामिपि भारत ।। ९९

हंतुं न कुरुते बुद्धिं रुद्रभक्त इति स्मरन् ।।
तारकस्तु ततः क्रुद्धो ययौ वेगेन केशवम् ।। १००

प्राह चैवं सुदुर्बुद्धे हन्मि त्वां पश्य मे बलम् ।।
देवानां चापि धर्माणां मूलं मतिमतां तथा ।।
हत्वा त्वामद्य सर्वांस्तांश्छेत्स्ये पश्याद्य मे बलम् ।। १०१

विष्णुरुवाच ।।[१]
दैत्येंद्र तव चास्माभिः किमहो श्रृणु सत्यताम् ।। १०२

रथे य एषो शर्वोऽयं हतऽस्मिन्सकलं हतम् ।।
श्रुत्वेति तारकः क्रुद्धस्तूर्णं रुद्ररथं ययौ ।। १०३

अभि[२]सृत्य सं जग्राह रुद्रस्य रथ कूबरम्[३]।।
यदा स कूबरं[४] क्रुद्धस्तारकः सहसाऽग्रहीत् ।। १०४

रेसतू रोदसी तूर्णं मुमुहुश्च महर्षयः ।।
व्यनदंश्च महाकाया दैत्या जलधरोपमाः ।। १०५

---

१ ब. प्रतौ "विष्णु " इति स्यात् ।
२ ब. सत्य
३ ब. कूवरं
४ ब. कूरवं

आसीच्च निश्चितं तेषां जितमस्माभिरित्युत[1] ।।
तारकस्याप्यभिप्रायं भगवान्वीक्ष्य शंकरः ।। १०६

उमया सह संत्यक्त्वा रथं वृषभमारुहत्[2] ।।
ओमित्यथ जपन्ब्रह्मा आकाशं सहसाश्रितः ।। १०७

ततस्तं शतसिंहं च रथं रुद्रेण निर्मितम् ।।
उत्क्षिप्य पृथ्व्यामास्फोटय चूर्णयामास तारकः ।। १०८

शूलपाशुपतादीनि सहसोपस्थितानि च ।।
वारयामास गिरिशो भवः साध्य इति ब्रुवन ।। १०९

ततः स्ववंचित[3] ज्ञात्वा रुद्रेणात्मानमीर्ष्यया ।।
विनदन्सहसाऽधावद्वृष भस्थं महेश्वरम् ।। ११०

ततो जनार्दनोऽधावच्चक्रमुद्यम्य वेगतः ।।
वज्रमद्रिस्तथोद्यम्य दंडं चापि यमो नदन् ।। १११

गदां धनेश्वरः क्रुद्धः पाशं च वरुणो नदन् ।।
वायुर्महांकुशं घोरं शक्तिं वह्निर्महाप्रभाम् ।। ११२

---

१ ब. तं
२ ब. प्रतौ "रु" पाठः ।
३ ब. सर्वंचित

निर्ऋतिर्निशितं खड्गं रुद्राः[१] शूलानि कौपिताः[२] ।।
धनूंषि साध्वा देवाश्च परिधान्वसवस्तथा ।। ११३

विश्वेदेवाश्च मुसलं चंद्रार्कौ स्वप्रभामपि ।।
औषधीश्चाश्विनौ देवौ नागाश्च ज्वलितं विषाम् ।। ११४

हिमाद्रि प्रमुखाश्चापि समुद्यम्य महीधरान् ।।
भृशमुन्नदता देवान्धावतो वीक्ष्य तारकः ।। ११५

निवृत्तः सहसा पार्थ महागज इवोन्नदन् ।।
स वज्रमृष्टि नाहत्य भुजे शक्रमपातयत ।। ११६

दंडं यमादुपादाय मुघ्नर्याहत्य न्यपातयत् ।।
उरसाहत्य सगदं धनदं भुव्यपातयत् ।। ११७

वरुणात्पाशमादाय तेन बद्धान्यपातयत् ।।
महांकुशेन वायुं च चिरं मुघ्निर्न जघान सः ।। ११८

फूत्कारैरुद्धतं वह्निं शमयामास तारकः ।।
निर्ऋतिं[३] खडगमादाय हत्वा तेन न्यपातयत् ।। ११९

---

१ ब. रुद्रा
२ ब. कौपिते
३ ब. तैः

~~[illegible]~~

शूलैरेव तथा रुद्राः साध्याश्च धनुषार्दिताः ।।
परिघैरेव वसवो मुशलैरेव विश्वकाः ।। १२०

रेणुनाच्छाद्य चंद्रार्कौ वल्मीकस्थाविवेक्षितौ ।।
महोग्राश्चौषधीस्तालैरश्विभ्यां सोऽभ्यवर्तयत् ।। १२१

सविषाश्च कृता नागा निर्विषाः पादकुट्टनैः ।।
पर्वताः पर्वतैरेव निरुच्छ्वासा भृशं कृताः ।। १२२

एवं तदेव सैन्यं च हाहाभूतम चेतनम् ।।
कृत्वा मुहूर्तादाधावचक्रपाणिं तमुन्नदन् ।। १२३

ततश्चांतर्दधे सद्यः प्रहसन्निव केशवः ।।
कुयोगिन इव स्वामी सदा बुद्धिमतां वरः ।। १२४

अपश्यंस्तारको विष्णुं[1] पुनर्वृषभवाहनम् ।।
अधावत्कुपितो दैत्यो मुष्टिमुद्यम्य वेगतः ।। १२५

अचिरां शुरिवालक्ष्यो लक्ष्योथ भगवान्हरिः ।।
आबभाषे ततो देवान्बाहुमुद्यम्यचोच्चकैः ।। १२६

---

१ ब. विष्णुः

पलायध्वमहो देवाः शक्तिश्चेद्वः पलायितुम् ।।
विमूढा हि वयं सर्वे ये बालवचसागताः ।। १२७

किं न श्रुतः पुरागीतः श्लोकः स्वायंभुवेनयः ।।
यथा बालेषु निक्षिप्ताः स्त्रीषु पंडितकेषु च ।। १२८

अपस्मारिषु चैवापि सर्वे ते संशयं गताः[1] ।।
प्रत्यक्षं तदिदं सर्वमधुनाचात्र दृश्यते ।। १२९

अज्ञासिष्म पुरैवैतद्रुद्रभक्तं न हंत्यसौ ।।
यत्प्रतिज्ञां नाकरिष्यन्न स्यान्नः कदनं महत् ।। १३०

अथेष अथैष यदि दैत्येंद्रं न निहंति कुबुद्धिमान् ।।
मा भयं वो महाभागा निहनिष्यामि वो रिपून ।। १३१

अद्य मे विपुलं बाहुवीर्यबलं पश्यत देवताः ।।
दैत्याधमं नाशयामि मुष्टिनैकेन पश्यत ।। १३२

मया हि दक्षिणो बाहुर्दत्तश्च भवतां सदा ।।
रिपून्वा निहनिष्यामि सत्यं तत्परिपालये ।। १३३

---

१ ब. गता

यैं/बरे ये च पाताले भुवि ये च महासुराः ।।
क्षणात्तान्नाशयिष्यामि महावातो धनानिव[1] ।। १३४

एवमुक्त्वा जगन्नाथो मुष्टिमुद्यम्य दक्षिणम् ।।
निरायुधस्तार्क्ष्यपृष्ठादवप्लुत्याभ्य धावत ।। १३५

तस्मिन्धावति गोविंदे चचाल भुवन त्रयम् ।।
विमूर्छितमभूद्विश्वं देवा भीतिं परां ययुः ।। १३६

धावतश्चापि कल्पांतं रुद्रकल्पस्य तस्य याः ।।
मुखात्समुद्ययुर्ज्वालास्ताभिः खर्वशतं हतम् ।। १३७

ततो/तरिक्षे वाचश्च प्रोचुः सिद्धाः स्वयं तदा ।।
जहि कोपं वासुदेव त्वयि क्रुद्धे क्व वै जगत् ।। १३८

अनादत्यैव तद्वाक्यं ब्रुवन्नान्यत्करोम्यहम् ।।
आह्वयंश्च महादैत्यं क्रुद्धो हरिधावत ।। १३९

उवाच वाचं[2] साधूंश्च यत्नात्पालयतां फलम् ।।
दुष्टान्विनिघ्नतां चैव तत्फलं मम जायताम् ।। १४०

---

१ ब. धनानि च
२ ब. चासौ

अथापश्यन्महासेनो रुद्रं यांतं च व तारकम् ।।
तारकं चान्वधावन्तं पुराणपुरुषं हरिम् ।। १५१

जगच्च क्षुब्धमत्यर्थं स्वां प्रतिज्ञां पुरा कृताम् ।।
पश्चिमां प्रतिलंबंच भास्करं चापि लोहितम् ।। १५२

आकाशवाणीं शृण्वंश्च किं स्कन्द त्वं विषीदसि ।।
पश्चात्तापो यदि भवेत्कृत्वा ब्रह्मवधं त्वयि ।। १५३

स्थापयेर्लिंगमीशस्य मोक्षो हत्याशतै रपि ।।
आविवेश महाक्रोधं दिधक्षुरिव मेदिनीम् ।। १५४

अथोत्प्लुत्य मयूरात्स प्रहसन्निव केशवम् ।।
बाहुभ्यामप्युपादाय प्रोवाच भवनंदनः ।। १५५

जानामित्वामहं विष्णो महाबुद्धि पराक्रमम्[१] ।।
भूतभव्यभविष्यांश्च दैत्यान्हंस्यपि हूंकृतैः ।। १५६

त्वमेव हंता दैत्यानां देवानां परिपालकः ।।
धर्मसंस्थापकश्च त्वमेष ते रचितोंजलिः ।। १५७

---

१ ब. पराक्रमां

क्षणार्धं पश्य मे वीर्यं भास्करो[1] लोहितायते ।।
एवं प्रणम्य स्कन्देन वासुदेवः प्रसादितः ।। १४८

विशेषाऽभूत्तमालिंग्य वचनं केशवोऽब्रवीत् ।।
सनाथस्त्वद्य धर्मोऽयं सुराश्चैव त्वया गुह ।। १४९

स्मरात्मानं यदर्थं त्वमुत्पन्नोऽसि महेश्वरात् ।।
साधूनां पालनार्थाय दुष्ट संहरणाय च ।।
सुरविप्रकृते जन्म जीवितं च महात्मनाम् ।। १५०

रुद्रस्य देव्या गंगायाः कृत्तिकानां च तेजसा ।।
साधूनां च कृते यस्य धनं वीर्यं च संपदः ।। १५१

सफलं तस्य तत्सर्वं नान्यथा रुद्र नंदन ।। १५२

अद्य धर्मश्च देवाश्च गावः साध्याश्च ब्राह्मणाः ।।
नंदंतु तव वीर्येण प्रदर्शय निजं बलम्[2] ।। १५३

स्कंद उवाच ।।
या गतिः शिवत्यागेन त्वत्त्यागेन च केशवः ।।
तां गतिं प्राप्नुयां क्षिप्रं हन्मि चेन्न हि तारकम् ।। १५४

---

१ ब. भास्करे
२ ब. बलः

यत गतिः श्रुतित्यागेन साध्वीभार्यातिपीडनात् ।।
निष्ठुरस्य गतिर्या च तां गतिं यामि केशव ।। १५५

इत्युक्ते सुमहान्नादः संप्रजज्ञे दिवौकसाम् ।।
प्रशशंसुर्गृहं केचित्केचिन्नारायणं प्रभुम् ।। १५६

~~कर्णि~~ ततस्तार्क्ष्यं समारुह्य हरिस्तस्मिन्महारणे ।।
ताम्रचूडं महासेनस्तारकं चाप्यधावताम् ।। १५७

लोहितांबरसंवीतो लोहितस्त्रग्विभूषणः ।।
लोहिताक्षो महाबाहुर्हिरण्यकवचः प्रभुः ।। १५८

भुजेन तोलयन्छक्तिं सर्वभूतानि कम्पयन् ।।
प्राप्य तं तारकं[१] प्राह महासेनो हसन्निव ।। १५९

तिष्ठतिष्ठ सुदुर्बुद्धे जीवितं ते मयि स्थितम् ।।
सुत्दृष्टः क्रियतां लोको दुर्लभः सर्वसिद्धयः ।। १६०

यते सुनिष्ठुरत्वं च धर्मे देवेषु गोषु च ।।
तस्य ते प्रहराम्यद्य स्मरशस्त्रं सुशिक्षितम् ।। १३१

---

१ ब. तारकः

एवमुक्ते गुहेनाथ निवृत्तस्यास्य भारत ।।
तारकस्य त्रिरोदेशात्कापि नारी विनिर्ययौ ।। १६२

तेजसा भासयंती तमध ऊर्ध्वं दिशो दश ।।
दृष्ट्वा नारीं गुहः प्राह कासि कस्माच्च निर्गता ।। १६३

नार्युवाच ।।[1]
अहं शक्तिर्गुहाख्याता भूतलेषु सदास्थिता ।।
अनेन दैत्यराजेन महता तपसार्ज्जिता ।। १६४

सुरेषु सर्वेषु वसामि चाहं विप्रेषु शास्त्रार्थरतेषु चाहम् ।।
साध्वीषु नारीषु तथा वसामि विना गुणान्नास्मि वसामि कुत्रचित्।। १६५

तदस्य पुण्यसंघस्य संप्राप्तोद्यावधिर्गुह ।।
तदेनं त्यज्य [2]यास्यामि जह्येन विश्वहेतवे ।। १६६

तस्यां ततो निर्गतायां दैत्यशीर्षं व्यकम्पयत् ।।
कंपितं चास्य देहं गतवीर्योऽभवत्क्षणात् ।। १६७

एतस्मिन्नंतरे शक्तिं सोऽक्षिपद्गिरिजात्मजः ।।
उल्काज्वाला विमुच्चंतीमति सूर्याग्नि सप्रभाम् ।। १६८

---

१ ब. प्रतौ "नार्यु०" इति पाठः ।
२ ब. य

कल्पांभोधि समुन्नादां दिधक्षंतीं जगद्यथा ।।
तारकस्यांत कालाय अभाग्यस्य दशामिव ।। १६९

दारणीं पर्वतानां च सर्वसत्त्व बलाधिकाम् ।।
उत्क्षिप्य तां विनद्योच्चैरमुच्चत्कुपितो गुहः ।। १७०

धर्मश्चेद्बलवाँल्लोके धर्मो जयति चेत्सदा ।।
तेन सत्येन दैत्योयं प्रलयं यात्वि तीरयन् ।। १७१

सा कुमारभुजोत्सृष्टा दुर्निवार्या दुरासदा ।।
विभेद हृदयं चास्य भित्वा च धरर्णी[1] गता ।। १७२

निःसृत्य जलकल्लोल पूर्विका स्कंदमाययौ ।।
स च संताडितः[2] शक्त्या विभिन्नहृदयो सुरः ।। १७३

एवं प्रताप्यत्रैलोक्यं[3] निर्जित्य बहुशः सुरान् ।।
महारणे कुमारेण निहतः पार्थ तारकः ।। १७४

एतस्मिन्नहते दैत्ये प्रहर्षं विश्वमाययौ ।। १७५

ववुर्वातास्तथा पुण्याः सुप्रभोभूदिवाकरः ।।
जज्वलुश्चाग्नयः शांताः शांता दिग्जनितस्वनाः ।। १७६

---

१ ब. धरणीं
२ ब. ता
३ ब. य

ततः पुनः स्कंदमाह प्रहृष्टः केशवोऽरिहा ।।
स्कंदस्कंद महाबाहो बाणोनाम बलात्मजः ।। १७७

क्रौंचपर्वतमादाय देवसंधान्प्रबाधते ।।
सो धुना ते भयाद्वीर पलायित्वा नगं गतः ।।
जहि तं पाप संकल्पं क्रौंचस्थं शक्तिवेगतः ।। १७८

ततः क्रौंचं महातेजा नानाव्यालविनादितम् ।।
शक्त्या बिभेद बहुभिर्वृक्षजीविभिः संकुलम् ।। १७९

तत्र व्याल सहस्राणि दैत्य कोटययुतं तथा ।।
ददाह बाणं च गिरिं भित्वा शक्तिर्महारवा ।। १८०

अद्यापि छिद्रं तत्पार्थ क्रौंचस्य परिवर्तते ।। १८१

येन हंसाश्च क्रौंचाश्च मानसाय प्रयांति[१] च ।।
हत्वा बाणं महाशक्तिः पुनः स्कंदं समागता[२] ।। १८२

ततो हरींद्रप्रमुखाः प्रतुष्टुवुर्ननृतुश्च रंभाप्रमुखा वरांगनाः ।।
वाद्यानि सर्वाणि च वादयंतस्तं साधु साध्वित्यमराजगुर्भृशम् ।। १८३

३ * ३ इति श्री स्कांदे महापुराण...... कुमारकृत तारकवध वर्णनं नाम द्वात्रिंशोऽध्यायः ।।

---

१ ब. त्रयाति
२ ब. ताः
* ३ ब. इति श्री स्कंदपुराणे कुमारिकाखंडे तारकवधः द्वात्रिंशोऽध्याय ।।३२।।